| Series : SKS/1 |
|---|

कोड नं.
Code No. **49/1**

रोल नं.
**Roll No.** | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्ण में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*अवधि : 3 होरात्रयम्]* *[ पूर्णाङ्का : 100*
*निर्धारित समय : 3 घंटे]* *[ अधिकतम अंक : 100*
*Time allowed : 3 hours]* *[Maximum marks : 100*

**निर्देशा :**
**निर्देश :**
**Instructions :**

1. उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि ।
   उत्तर उत्तर-पुस्तिका में ही लिखें ।
   *Write answers in the answer-sheet only.*
2. संकेताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि ।
   जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।
   *Answer all questions in Sanskrit unless instructions are given otherwise.*

अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।
इस प्रश्नपत्र में **चार** खण्ड हैं ।
*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश - अवबोधनम् (अपठितांश - अवबोधन ) | 15 अङ्काः |
| Section A | : | Unseen Reading Comprehension | |
| खण्डः ख | : | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| Section B | : | Writing Skills in Sanskrit | |
| खण्डः ग | : | पठितांश - अवबोधनम् संस्कृत - साहित्य - परिचयः च (पठितांश-अवबोधन एवं संस्कृत साहित्य परिचय) | 40 + 10 = 50 अङ्काः |
| Section C | : | Reading Comprehension & Introduction to History of Sanskrit Literature | |
| खण्डः घ | : | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | 20 अङ्काः |
| Section D | : | Metres and Figures of Speech | |

## खण्डः क (Section A) — 15 अङ्काः

### अपठितांश – अवबोधनम्

### अपठितांश – अवबोधन

### Unseen Reading Comprehension

1. अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :

अधोलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following **two** passages and answer the given questions in Sanskrit :

**(क) प्रथमः अनुच्छेदः**

भारतदेशः आप्राचीनकालादपि विद्याप्रधानः । विद्याप्रदातारः गुरवः पूज्यतमाः । "गुरुर्ब्रह्मा, गुरुर्विष्णुः, गुरुर्देवो महेश्वरः । गुरुः साक्षात् परं ब्रह्म, तस्मै श्री गुरवे नमः" इत्येव अस्माकं मूलमन्त्रः । गुरुणा विना कापि विद्या पूर्णतां न प्राप्नोति । यः गुरुम् आद्रियते, शुश्रूषते, गुरुपदेशान् श्रद्धया शृणोति, तस्मै विद्या स्वयं स्पृहयति, गुरुः अपि तादृशं शिष्यं वात्सल्येन पश्यति, सर्वाः विद्याः शिक्षयति च ।

प्रश्नाः

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कः खलु साक्षात् परं ब्रह्म ?

(ii) गुरुणा विना का पूर्णतां न प्राप्नोति ?

(ब) पूर्णवाक्येन उत्तरत । $1 \times 2 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

गुरुः कीदृशं शिष्यं वात्सल्येन पश्यति ?

(स) यथानिर्देशम् उत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'प्राप्नोति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'विद्याप्रदातारः' इति विशेषणस्य विशेष्यं किम् ?

(iii) 'सेवां करोति' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(iv) 'आधुनिककालात्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**(ख) द्वितीयः अनुच्छेदः**

गीतायाः द्वादशे अध्याये भगवान् कृष्णः वदति – "यः निन्दां स्तुतिं च समानतया स्वीकरोति, सः भक्तः मम प्रियः ।" 'तुल्यनिन्दास्तुतिः' इति शब्दः सामान्यः इव प्रतीयते परन्तु तदनुगुणम् आचारणं महत् कष्टसाधकम् । निन्दावचनानां श्रवणेन मानसिकः उद्वेगः जायते । स्तुतिशब्दानां श्रवणेन मनसः उल्लासः भवति । निन्दकाः, दोषदर्शयितारः च भगवता एव प्रेष्यन्ते । यः निन्दकस्य कथनं शान्तिपूर्वकं शृणोति, विरोधं न करोति अपितु आत्मनिरीक्षणं करोति, सः वर्धते । यदा स्तुतिः श्रूयते तदा 'अत्र मम किमपि वैशिष्ट्यं नास्ति' इति चिन्तनीयम् । एतत् सर्वं मम गुरुजनानां प्रसादः इति यः स्वीकरोति सः विनयी भवति । अतः तुल्यनिन्दास्तुतित्वम् अभ्यासेनैव सिध्यति । यः एवम् आचरति, सः जीवने निरन्तरम् उन्नतिं प्राप्नोति ।

प्रश्नाः

(अ) एकपदेन उत्तरत । $1 \times 2 = 2$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) निन्दकाः केन एव प्रेष्यन्ते ?

(ii) गीतायाः कस्मिन् अध्याये प्रियभक्तस्य लक्षणं भगवता प्रोक्तम् ?

(ब) पूर्णवाक्येन उत्तरत । 2

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

कीदृश: जन: भगवत: प्रिय: भक्त: ?

(स) यथानिर्देशम् उत्तरत । 1 × 4 = 4

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'जायते' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'कृपा' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(iii) 'उद्वेगस्य' किं विलोमपदमत्र प्रयुक्तम् ?

(iv) 'प्रिय:' इति विशेषणस्य विशेष्यं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं **संस्कृतेन** लिखत । 2

इस अनुच्छेद के लिए उपयुक्त शीर्षक **संस्कृत** में लिखिए ।

Write a suitable title for this passage in **Sanskrit**.

## खण्ड: ख (Section B) 15 अङ्का:

## संस्कृतेन रचनात्मकलेखनम्

## संस्कृत में रचनात्मक लेखन

## Writing Skills in Sanskrit

2. मञ्जूषात: उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा लिखत : 1 × 10 = 10

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूरा करके लिखिए :

Complete and re-write the following story, with the help of the words given in the box below :

एक: अहङ्कारी राजा पण्डितान् ______ (i) अपृच्छत् "वदत ! क: श्रेष्ठ:, अहं वा ईश्वर: वा ?" ______ (ii) पण्डिता: अचिन्तयन् – किं कुर्म: ? इत: प्राणहानि: तत: ______ (iii) । एक: वृद्ध: प्राणम्य अवदत् – "राजन् ! निस्सन्देहं ______ (iv) श्रेष्ठ: न ईश्वर: ।" राजा ______ (v) मस्तकम् उन्नयन् अपृच्छत् "तत् कथम् ?" वृद्ध-पण्डित: अवदत् – "राजन् ! त्वम् अस्मान् ______ (vi) निष्कासयितुं क्षम: न तु ______ (vii) । निष्कासयति चेत् कुत्र स्थानं ______ (viii) ?" राजा स्वमूर्खताम् ______ (ix) वृद्धं च ______ (x) ।

**मञ्जूषा**

| |
|---|
| असत्यवादनम्, गर्वेण, आहूय, व्याकुला:, राज्यात्, अवगतवान्, त्वमेव, ईश्वर:, सम्मानितवान्, दास्यति । |

3. मञ्जूषातः पदानि चित्वा 'शरीरम् आद्यं खलु धर्मसाधनम् ।' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत । $1 \times 5 = 5$

मञ्जूषा से पद लेकर 'शरीरम् आद्यं खलु धर्मसाधनम्' विषय पर **पाँच** वाक्य संस्कृत में लिखिए ।

Write **five** sentences in Sanskrit on the subject 'शरीरम् आद्यं खलु धर्मसाधनम्' with the help of the words given in the box below.

**मञ्जूषा**

| |
|---|
| शरीरम्, धर्मकार्याणाम्, सर्वेषां, स्वास्थ्यम् कार्याणि, शक्यन्ते, वरदानम्, स्वस्थशरीरम्, व्यायामः, आसनानि, करणीयः, स्वस्थे शरीरे, मनः, बुद्धिः, आनन्दः, जीवने, कार्यक्षमता, तीव्रा । |

## खण्ड : ग (Section C) 40 + 10 = 50 अङ्काः

### पठितांश – अवबोधनम् संस्कृत - साहित्य-परिचयः च

### पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय

### Reading Comprehension & Introduction to History of Sanskrit Literature

4. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए :

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit :

**(क) गद्यांशः**

निरन्तरम् आत्मोन्नतये चेष्टमानाः लोभाक्रान्तहृदयाः मनुजन्मानः किल प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते । न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति परं तृणवद् उपेक्षन्ते स्नेहम् । अहितमिव परित्यजन्ति आर्जवम् । अमङ्गलमिव उपघ्नन्ति विश्वासम् । न स्वल्पमपि बिभ्यति पापाचारेभ्यः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) मानवाः तृणवत् कम् उपेक्षन्ते ?

(ii) मनुष्याः कस्य साधनाय पूर्णरूपेण प्रयतन्ते ?

(ब) पूर्णवाक्येन उत्तरत । $1 \times 2 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

**Answer in a complete sentence.**

मनुष्या: कथं व्यवहारं कुर्वन्ति ? बिन्दुद्वयं लिख्यताम् ।

(स) यथानिर्देशम् उत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

**Answer as directed.**

(i) 'सरलता' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(ii) 'प्रवर्तन्ते' इति क्रियापदस्य किं कर्तृपदम् ?

(iii) 'मनुजन्मान:' इति पदस्य किं विशेषणम् ?

(iv) 'मङ्गलम्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**(ख) पद्यम्**

**मनसि वचसि काये पुण्यपीयूषपूर्णा –**
**स्त्रिभुवनमुपकारश्रेणिभि: प्रीणयन्त: ।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं,**
**निजहृदि विकसन्त: सन्ति सन्त: कियन्त: ।।**

**प्रश्ना:**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

**Answer in one word.**

(i) सज्जना: उपकारै: कं प्रीणयन्ति ?

(ii) कस्य गुणान् सज्जना: पर्वतीकुर्वन्ति ?

(ब) पूर्णवाक्येन उत्तरत । $1 \times 2 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

**Answer in a complete sentence.**

कीदृश: सन्तो जना: संसारे दुर्लभा: ?

(स) यथानिर्देशम् उत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

**Answer as directed.**

(i) 'सन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'कियन्त:' इति पदस्य विशेष्यं किम् ?

(iii) 'शरीरे' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(iv) 'विषम्' इत्यस्य किं विलोमपदमत्र प्रयुक्तम् ?

(ग) नाट्यांश:

बटव: पश्यतु कुमारस्तावदाश्चर्यम् ।

लव: दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्व: ।

बटव: कथं ज्ञायते ?

लव: ननु मूर्खा: । पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्या: कवचिनो दण्डिनो निषङ्गिणश्च रक्षितार: । यदि च विप्रत्ययस्तत्पृच्छत ।

प्रश्ना:

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कीदृश: अश्व: तत्र आसीत् ?

(ii) अश्वस्य रक्षार्थं कति रक्षितार: आसन् ?

(ब) पूर्णवाक्येन उत्तरत । $1 \times 2 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

कीदृशा: सैनिका: अश्वस्य रक्षणं कुर्वन्ति स्म ?

(स) यथानिर्देशमुत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'पश्यथ' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'प्रत्यय:' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?

(iii) 'निषङ्गिण:' इति विशेषणस्य विशेष्यं किम् ?

(iv) 'युष्माभि:' इति सर्वनामपदं केभ्य: प्रयुक्तम् ?

5. शब्दार्थान् मेलयित्वा लिखत । $\frac{1}{2} \times 4 = 2$

शब्दों का अर्थों से मिलान करके लिखिए :

Match the words with their meanings and rewrite them :

| शब्दा: | अर्था: |
|---|---|
| (अ) यते | (i) प्रतिज्ञां |
| (ब) सङ्गरम् | (ii) अयोध्या |
| (स) नभस्त: | (iii) प्रयत्नं करोमि |
| (द) साकेत: | (iv) आकाशात् । |

6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । $1 \times 4 = 4$

रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए ।

Frame questions on the basis of underlined words.

(i) अन्धकार: <u>मेघमालाभि:</u> द्विगुणित: ।

(ii) हयस्य खुरा: <u>पाषाणखण्डेषु</u> स्खलन्ति ।

(iii) अयं सादी <u>स्वकार्यात्</u> न विरमति ।

(iv) भयानकेन <u>स्वनेन</u> कवलीकृतमिव गगनतलम् ।

7. अधोलिखित**भावार्थयो**: रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत : $3 + 3 = 6$

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति कीजिए :

Fill in the blanks in the following **two** explanations with the help of the words given in the box below :

(अ) तस्मादसक्त: सततं कार्यं कर्म समाचर ।

असक्तो ह्याचरन्कर्म परमाप्नोति पूरुष: ।।

**भावार्थ:**

भगवान् ______ (i) अर्जुनम् उपदिशति यत् त्वम् ______ (ii) भूत्वा निरन्तरम् ______ (iii) कुरु ।

य: नर: आसक्तिरहित: भूत्वा ______ (iv) करोति स: ______ (v) पुरुषम् ______ (vi) प्राप्नोति ।

(ब) अन्धन्तम: प्रविशन्ति येऽविद्यामुपासते ।

ततो भूय इव ते तमो य उ विद्यायां रता: ।।

**भावार्थ:**

ये जना: ______ (i) उपासनां कुर्वन्ति, ते घोरे ______ (ii) पतन्ति, अर्थात् ये आध्यात्मिकविद्यां ______ (iii) अन्या: विद्या: उपासन्ते तेषां जीवनम् अन्धकारमयं भवति परन्तु ये विद्याया: विषये ______ (iv) कुर्वन्ति, सर्वेषां ______ (v) कुर्वन्ति तेषां जीवनम् ______ (vi) अन्धकारमयं भवति ।

**मञ्जूषा**

| |
|---|
| अन्धकारे, अविद्याया:, दम्भं, वञ्चनं, त्वक्त्वा, अधिकतरम्, कृष्ण:, अनासक्त:, करणीयं, कर्म, परमम्, ईश्वरम् । |

8. अधोलिखितयो: **श्लोकयो**: अन्वययो: रिक्तस्थानपूर्तिं कुरुत : $1\frac{1}{2} + 1\frac{1}{2} = 3$

**निम्नलिखित दोनों** श्लोकों के अन्वयों में रिक्त स्थानों की पूर्ति कीजिए :

**Fill in the blanks in the following prose-order renderings of the two verses :**

(i) एतावदुक्त्वा प्रतियातुकामं,
शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन् ! गुरवे प्रदेयम्,
त्वया कियद्वेति तमन्वयुङ्क्त ।।

**अन्वय:**

एतावद् उक्त्वा ______ (i) महर्षे: प्रतियातुकामम् ______ (ii) निषिध्य, विद्वन् ! त्वया गुरवे किम् ______ (iii) कियद्वा प्रदेयम् इति अन्वयुङ्क्त ।

(ii) दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्तव्य: ।
पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ।।

**अन्वय:**

दातव्यम् भोक्तव्यं, धनविषये ______ (i) न कर्तव्य:, ______ (ii) इह मधुकरीणाम् सञ्चितम् ______ (iii) अन्ये हरन्ति ।।

9. यथानिर्देशम् उत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत ।

कर्ता और क्रियापद चुनकर लिखिए ।

Select the subject and the verb.

(i) क्रूरोऽयं किन्तुर्मध्ये प्रविश्य सर्वं विनाशयति ।

(ii) अस्य 'किन्तोः' कारणात् कस्मिन्नपि कार्ये सफलता दुर्घटा अस्ति ।

(ब) विशेषणपदं चिनुत । $1 + 1 = 2$

विशेषणपद चुनिए ।

Select the adjectives.

(i) अस्मिन् महामोहकारिणि यौवने च तथा प्रयतेथाः यथा नोपहस्यसे जनैः ।

(ii) महतीयं खल्वनर्थपरम्परा ।

(स) रेखाङ्कितसर्वनामपदे काभ्यां प्रयुक्ते ? $1 + 1 = 2$

निम्नलिखित वाक्यों में रेखाङ्कित सर्वनामपद किनके लिए प्रयुक्त हुए हैं ?

For whom the underlined pronouns have been used ?

(i) <u>मम</u> जीवनप्रदीपो निर्वापितो भवितुमिच्छति ।

(ii) भगवान् <u>त्वां</u> दीर्घजीवनं कारयतु ।

(द) अधोलिखितपंक्तिभ्यां 'कम्पमानाः' तथा 'ग्रसितम्' इति पदयोः समानार्थकपदे चित्वा लिखत : $1 + 1 = 2$

निम्नलिखित पंक्तियों में से 'कम्पमानाः' और 'ग्रसितम्' पदों के समानार्थक पद चुनकर लिखिए :

Select and write the synonyms of 'कम्पमानाः' and 'ग्रसितम्' from the following lines :

(i) 'पदे पदे दोधूयमानाः वृक्षशाखाः सम्मुखम् आघ्नन्ति परं दृढसङ्कल्पोऽयं सादी स्वकार्यात् न विरमति ।'

(ii) 'सत्त्वानां क्रन्दनस्य च भयानकेन स्वनेन कवलीकृतमिव गगनतलम् ।'

(य) कः कं कथयति ? $\frac{1}{2} \times 4 =$

कौन किसको कह रहा है ?

Who is saying this to whom ?

(i) 'तेन प्रेषितोऽहं त्वामाह्वातुं समागतः ।'

(ii) 'बुद्धिमता राज्यं न प्रार्थनीयम् ।'

10. (क) अधोलिखितलेखककानाम् कस्यापि **एकस्य** काव्यस्य नाम लिखत : **1 × 5 = 5**

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए :

Write the names of any **one** work of each of the following poets :

दाराशिकोहः, अम्बिकादत्तव्यासः, भर्तृहरिः, व्यासः, चन्द्रशेखरदासवर्मा ।

(ख) अधोलिखितरचनानां लेखकानां नामानि लिखत : **1 × 5 = 5**

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :

Write the names of the authors of the following works :

प्रबन्धपारिजातः, कादम्बरी, रघुवंशम्, उत्तररामचरितम्, शिशुपालवधम् ।

## खण्डः घ (Section D) **20 अङ्काः**

### छन्दोऽलङ्काराः

### छन्द एवम् अलङ्कार

### Metres and Figures of Speech

11. (अ) प्रश्नान् उत्तरत । **1 × 4 = 4**

प्रश्नों के उत्तर दीजिए ।

Answer the questions.

(i) 'कम्' इति पदे स्वरः गुरुः लघुः वा ?

(ii) 'भूतले' इति पदे कः गणः ?

(iii) वंशस्थछन्दसि प्रतिचरणं कति वर्णाः ?

(iv) मालिनीछन्दसि 'नन' इति पदस्य कः अर्थः ?

(ब) निम्नलिखितपरिभाषाः पूरयत : **1 × 3 = 3**

निम्नलिखित परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions :

(i) _______ जतजास्ततो गौ ।

(ii) सूर्याश्वैर्यदि _______ शार्दूलविक्रीडितम् ।

(iii) उक्ता वसन्ततिलका _______ _______ ।

(स) अधोलिखितपङ्क्त्यां किं छन्दः ? **1**

निम्नलिखित पङ्क्ति में कौन सा छन्द है ?

What is the metre in the following line ?

निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ?

(द) कस्यचिदे**कस्य** छन्दसः उदाहरणं लिखत । **2 × 1 = 2**

किसी **एक** छन्द का उदाहरण लिखिए ।

Write an example of any **one** metre :

मन्दाक्रान्ता, अनुष्टुप् ।

12. (अ) अधोलिखितानाम् अलङ्काराणां परिभाषाः पूरयत : **1 × 4 = 4**

निम्नलिखित अलङ्कारों की परिभाषाएँ पूरी कीजिए :

Complete the definitions of the following figures of speech :

(i) भवेदर्थान्तरन्यासो ______________ ।

(ii) श्लिष्टैः पदैः ______________ ।

(iii) वर्ण ______________ अनुप्रासः ।

(iv) तद्रूपकम् ______________ ।

(ब) कस्यचिदे**कस्य** अलङ्कारस्य उदाहरणं लिखत । **3 × 1 = 3**

किसी **एक** अलङ्कार का उदाहरण लिखिए ।

Write an example of any **one** of the following figures of speech :

यमकम्, उत्प्रेक्षा ।

(स) अधोलिखितपंक्तिषु के अलङ्काराः ? **3 × 1 = 3**

निम्नलिखित पंक्तियों में कौन-कौन से अलङ्कार हैं ?

What are the figures of speech in the following lines ?

(i) 'क्रन्दनस्य स्वनेन कवलीकृतमिव गगनतलम् ।'

(ii) 'विभूषणं मौनमपण्डितानाम् ।'

(iii) 'मनसि वचसि काये पुण्यपीयूषपूर्णाः ।'